३२ हेतुभिः दैवप्राबल्यादिप्रतिपादकैर्वचनैः ३३ ३६ अनेकाग्रः आकुलचित्तः अध्यायः समागतं १ २ मांसकथय ३ ७ ७ ७

पुत्रान्विवास्यतः साधून्नरिभिर्द्यूतनिर्जितान् सहदेव निवर्तस्व ननु त्वमसि मे प्रियः ३० शरीरादपि माद्रेय मामां त्याक्षीः कुपुत्रवत् प्रे
जंतु भ्रातरस्ते मा यदि सत्याभिसंधिनः मत्परित्राणजं धर्ममिहैव त्वमवाप्नुहि ३१ वैशंपायन उवाच एवं विलपतीं कुंतीमभिवाद्य प्र
णम्य च पांडवा विगतानंदा वनायैव प्रवव्रजुः ३२ विदुरश्चापि तामार्तां कुंतीमाश्वास्य हेतुभिः प्रावेशयद्गृहं क्षत्ता स्वयमार्तत
रः शनैः ३३ धार्तराष्ट्रस्त्रियस्तास्तु निखिलेनोपलभ्य तत् गमनं परिकर्षं च कृष्णाया द्यूतमंडले ३४ रुरुदुः सुस्वनं सर्वा वि
निंदंत्यः कुरून्भृशं दध्युश्च सुचिरं कालं करासक्तमुखांबुजाः ३५ राजा च धृतराष्ट्रस्तु पुत्राणामनयं तदा ध्यायन्नुद्विग्नहृदयो न
शान्तिमधिजग्मिवान् ३६ स चिंतयन्ननेकाग्रः शोकव्याकुलचेतनः क्षत्तुः संप्रेषयामास शीघ्रमागम्यतामिति ३७ ततो जगा
म विदुरो धृतराष्ट्रनिवेशनं तं पर्यपृच्छत्संविग्नो धृतराष्ट्रो जनाधिपः ३८ इति सभापर्वणि वनप्रवेशे ७७ वैशंपायन उवा
च तमागतमथो राजा विदुरं दीर्घदर्शिनं साशंक इव पप्रच्छ धृतराष्ट्रोंबिकासुतः १ धृतराष्ट्र उवाच कथं गच्छति कौंतेयो धर्मपु
त्रो युधिष्ठिरः भीमसेनः सव्यसाची माद्रीपुत्रौ च पांडवौ २ धौम्यश्चैव कथं क्षत्तः द्रौपदी च यशस्विनी श्रोतुमिच्छाम्यहं सर्वं ते
षामंतविचेष्टितं ३ विदुर उवाच वस्त्रेणासंवृत्य मुखं कुंतीपुत्रो युधिष्ठिरः बाहू विशालौ संपश्यन्भीमो गच्छति पांडवः ४
सिकता वपन्सव्यसाची राजानमनुगच्छति माद्रीपुत्रः सहदेवो मुखमालिप्य गच्छति ५ पांसूपलिप्तसर्वांगो नकुलश्चित्तविह्व
लः दर्शनीयतमो लोके राजानमनुगच्छति ६ कृष्णा च केशैः प्रच्छाद्य मुखमायतलोचना दर्शनीया प्ररुदती राजानमनुग

भाः२ छछति ७ ॥ ॥

स०
११९

याम्यानियमदैवत्यानि २ १० शरान्विरयावान ११ १६ असक्ताः परस्परमलग्नाः १७ हतपत्नीकाहतभर्तृकाः २१ २२ नैर्ऋतानिनैर्ऋतिकोणगान् २३

मा३

धौम्योयाम्यानिसामानिरौद्राणिचविशांपते गायनगच्छतिमार्गेषुकुशानादायपाणिना ८ धृतराष्ट्रउवाच विविधानीहरूपाणिकृत्वागच्छंति
पांडवाःतन्ममाचक्ष्वविदुरकस्मादेवंव्रजंतिते ९ विदुरउवाच निकृतस्यापितेपुत्रैर्हृतेराज्येधनेषुच नधर्माच्चलतेबुद्धिर्धर्मराजस्यधी
मतः १० योसौराजाघृणीनित्यंधार्तराष्ट्रेषुभारत निकृत्याभ्रंशितःक्रोधान्नोन्मीलयतिलोचने ११ नाहंजनंनिर्दहेयंदृष्ट्वाघोरेणचक्षुषा
सपिधायमुखंराजातस्माद्गच्छतिपांडवः १२ यथाचभीमोव्रजतितन्मेनिगदतःशृणु बाह्वोर्बलेनास्तिसमोममेतिभरतर्षभ १४ बाहू
विशालौकृत्वासौतेनभीमोपिगच्छतिबाहूविदर्शयन्राजनबाहुद्रविणदर्पितः १५ चिकीर्षन्कर्मशत्रुभ्योबाहुद्रव्यानुरूपतः प्रदिशन्
शरसंपातान्कुंतीपुत्रोर्जुनस्तदा १६ सिकतावपन्सव्यसाचीराजानमनुगच्छति असक्ताःसिकतास्तस्ययथासंप्रतिभारत १७
असक्तंशरवर्षाणितथामोक्ष्यतिशत्रुषु नमेकश्चिद्विजानीयान्मुखमद्येतिभारत मुखमालिप्यतेनासौसहदेवोपिगच्छति १८
नाहंमनास्याद्दृश्यंमार्गेस्त्रीणामितिप्रभो पांसूपलिप्तसर्वांगोनकुलस्तेनगच्छति १९ एकवस्त्राप्ररुदतीमुक्तकेशीरजस्वला
शोणिताक्तैकवसनाद्रौपदीवाक्यमब्रवीत २० यत्कृतेहमिदंप्राप्तातेषांवर्षेचतुर्दशेहतपत्नीहतसुताहतबंधुजनप्रियाः २१
बंधुशोणितदिग्धांग्योमुक्तकेश्योरजस्वलाः एवंकृतोदकाभार्याःप्रवेक्ष्यंतिगजाह्वये २२ कृत्वातुनैर्ऋतान्दर्भान्धीरोधौम्यः
पुरोहितः सामानिगायन्याम्यानिपुरतोयातिभारत हतेषुभारतेष्वाजौकुरूणांगुरवस्तदा २३ ॥ ॥

॥ ॥ ॥ ॥ ॥

राम०
११९

२७ अवसायंनिश्चयं २८ निर्यत्सुगच्छत्सु २९ ३० प्रव्याहरंति नगरसमीपेप्रेतमांसास्थ्याशीनिश्चानयंति प्रतिकूलंगच्छंतिवा ३१ ३५ ब्राह्मीश्रियंब्रह्मणिमाधीम्वर्यंसर्वे



एवंसामानिराशस्तेतेषुक्रोधोम्योपिगच्छति २४ हाहागच्छंतिनेनाथाः समवेक्ष्यमीदृशं अहोधिक्कुरुवृद्धानांवालानामिवचेष्टितं २५ राष्ट्रात्
पांडुदायादांल्लोभान्निर्वासयंतिये अनाथाः स्मवयंसर्वेवियुक्ताः पांडुनंदनैः २६ दुर्विनीतेषुलुब्धेषुकाप्रीतिः कौरवेषुनः इतिपौराः सुदुःखार्त्ता
क्रोशंतिस्मपुनःपुनः २७ एवमाकारलिंगैस्तेव्यवसायंमनोगतं कथयंतश्चकौंतेयावनंजग्मुर्मनस्विनः २८ एवंतेषुनराग्र्येषुनिर्गच्छत्सुगजा
ह्वयात् अनभ्रेविद्युतश्चासन्भूमिश्चसमकंपत २९ राहुरग्रसदादित्यमपर्वणिविशांपते उल्काचाप्यपसव्येहिपुरंकृत्वाव्यशीर्यत ३० प्रव्याह
रंतिक्रव्यादागृध्रगोमायुवायसाः देवायतनचैत्येषुप्राकाराट्टालकेषुच ३१ एवमेतेमहोत्पाताप्रादुरासन्दुरासदाः भरतानामभावायराजन्
दुर्मंत्रितेनच ३२ वैशंपायनउवाच एवंप्रवदतोरेवतयोस्तत्रविशांपते धृतराष्ट्रस्यराज्ञश्चविदुरस्यचधीमतः ३३ नारदश्चसभामध्ये
कुरूणामग्रतःस्थितः महर्षिभिःपरिवृतोरौद्रंवाक्यमुवाचह ३४ इतश्चतुर्दशेवर्षेविनंक्ष्यंतीहकौरवाः दुर्योधनापराधेनभीमार्जुनव
लेनच ३५ इत्युक्त्वादिवमाक्रम्यक्षिप्रमंतरधीयत ब्राह्मींश्रियंसुविपुलांविभ्रद्देवर्षिसत्तमः ३६ वैशंपायनउवाच ततोदुर्योधनः
कर्णःशकुनिश्चापिसौबलः द्रोणंद्वीपममन्यंतराज्यंचास्मैन्यवेदयत् ३७ अथाब्रवीत्ततोद्रोणोदुर्योधनममर्षणं दुःशासनंचकर्णं
चसर्वानेवचभारतान् ३८ अवध्यान्पांडवानाहुर्देवपुत्रान्द्विजातयः अहंवैशरणंप्राप्तान्वर्तमानोयथावलं गतान्सर्वात्मनाभक्त्या

धार्तराष्ट्रांन्सराजकान ३९

धुलोकेषुकामचारं ३३ द्वीपंआश्रयं ३७ ३८ सराजकान्राजसमूहसहितान् ३९ ३९ ३९ ॥

स०
१२०

४४ देवदत्तः दैवैर्दत्तः साध्यसोमयं ४५ ४६ मन्त्रिमत्त संगमः संग्रा परमं स्वनं तस्य यारा: प्रासासागेनापीसर्थः ४७ ४८ नैनंदे वतास्कृतेरतनत्थयःकल्पा

मा४

नोत्सहेयंपरिम्यक्तुंदैवंहिबलवत्तरं धर्म्मतः पांडुपुत्रोवैवनंगच्छंतिनिर्जिताः ५० तेचद्वादशवर्षाणिवनेवत्स्यंतिपांडवाः चरितब्रह्मचर्याश्च
क्रोधामर्षवसानुगाः ५१ वैरंनिर्यातयिष्यंतिमहद्दुःखायपांडवाः मयाचभ्रंशितोराजन्द्रुपदःसखिविग्रहे ५२ पुत्रार्थमयजद्राजावधाय
ममभारत याजोपयाजतपसापुत्रंलेभेसपावकात् ५३ धृष्टद्युम्नंद्रौपदींचवेदीमध्यात्सुमध्यमां धृष्टद्युम्नस्तुपार्थानांश्यालःसंबंधिनोमतः
पांडवानांप्रियरतस्तस्मान्मामभयं विशत् ५४ ज्वालावर्णोदेवदत्तोधनुष्मान्कवचीशरी मर्त्यधर्म्मतयातस्मादद्यमेसाध्वसोमहान् ५५
गतोहियपक्षतांतेषांपार्षदःपरवीरहा रथातिरथसंख्यायांयोग्रणीरर्जुनोयुवा ५६ सृष्टःप्राणोमयायतनैनचेत्संगमोमम किमन्यद्दुःखम
धिकंपरमंभुविकौरवाः ५७ धृष्टद्युम्नोद्रोणमत्युरितिविप्रथितंवचः मद्वधायश्रुतोप्येषलोकेचाप्यभिविश्रुतः ५८ सोयंनूनमनुप्राप्तस्त्व
त्कृतेकालउत्तमः त्वरितांकुरुतश्रेयोनैतदेतावताकृतं ५९ मुहूर्त्तंसुखमेवैतत्तालछायेवहैमनी यजध्वंचमहायज्ञैर्भोगानश्नीतदत्तच ६०
इत ...दशेवर्षेमहत्प्राप्स्यथवैशसं द्रोणस्यवचनंश्रुत्वाधृतराष्ट्रोब्रवीदिदं सम्यगाहगुरुःक्षत्तरुपावर्त्तयपांडवान् यदिते ननिवर्त्तंतेसत्
कृतायांतुपांडवाः सशस्त्ररथपादाताभोगवंतश्चपुत्रकाः इतिसभापर्वणिवनप्रवेशे ७८ वैशंपायनउवाच वनंगतेषुपार्थेषुनिर्जितेषु
दुरोदरे धृतराष्ट्रंमहाराजतदाचिंतासमाविशत् १ तंचिंतयानमासीनंधृतराष्ट्रंजनेश्वरं निःश्वसंतमनेकाग्रमितिहोवाचसंजयः १ ॥

एम०
१२०

...नएतावतापांडवनिर्वासनमात्रेणकृतंभवति ५१ हैमनीहेमंतसंबंधिनीवैशसंनाशं ५१ अध्यायः वनं २ २ २ २

युद्धशौंडैः युद्धैरसैः ४ ७ अवाचीनानि विपरीतानि ८ ९ ९ ९ ९ ९ ९ ९

संजयउवाच अवाप्यवसुसंपूर्णां वसुधां वसुधाधिप प्रव्राज्यपांडवान्राजन्किमनुशोचसि ३ धृतराष्ट्रउवाच अशोच्यंकुरुतस्तेषांये
षांवैरंभविष्यति पांडवैर्युद्धशौंडैर्हिबलवद्भिर्महारथैः ४ संजयउवाच तवेदंसुकृतंराजन्महद्वैरमुपस्थितं विनाशोयेनलोकस्यसानु
बंधोभविष्यति ५ वार्यमाणोहिभीष्मेणद्रोणेनविदुरेणच पांडवानांप्रियांभार्यांद्रौपदींधर्मचारिणीं ६ प्राहिणोदानयेहेपुत्रोदुर्यो ति३
धनस्तव सूतपुत्रंसुमंदात्मानिर्लज्जः प्रातिकामिनं ७ यस्मैदेवाःप्रयच्छंतिपुरुषायपराभवं बुद्धिंतस्यापकर्षंतिसोवाचीनानिपश्यति
८ बुद्धौकलुषभूतायांविनाशेसमुपस्थिते अनयोनयसंकाशोहृदयान्नापसर्पति ९ अनर्थाश्चार्थरूपेण अर्थाश्चानर्थरूपिणः
उत्तिष्ठंतिविनाशायनूनंतच्चास्यरोचते १० नकालोदंडमुद्यम्यशिरःकृंततिकस्यचित् कालस्यबलमेतावद्विपरीतार्थदर्शनं ११
आसादितमिदंघोरंतुमुलंलोमहर्षणं पांचालीमपकर्षद्भिः सभामध्येतपस्विनीं १२ अयोनिजांरूपवतींकुलेजातांविभावसोः
कोनुतांसर्वधर्मज्ञांपरिभूययशस्विनीं १३ पर्यानयेत्सभामध्येविनादुर्द्यूतदेविनं स्त्रीधर्मिणीवरारोहाशोणितेनपरिप्लुता १४
एकवस्त्राथपांचालीपांडवानभ्यवेक्षत हृतस्वान्हृतराज्यांश्चहृतवस्त्रान्हृतश्रियः १५ विहीनान्सर्वकामेभ्योदासभावमुपागता
तान् धर्मपाशपरिक्षिप्तानशक्तानिवविक्रमे १६ क्रुद्धांचानर्हतींकृष्णांदुःखितांकुरुसंसदि दुर्योधनश्चकर्णश्चकटुकान्य
ति३ भ्यभाषतां १७ ॥

शेषं हत्वा वंशेषं कतिपयानामेकस्य वा जीवनं भविष्यतीत्यर्थः २० २३ निह्रादकः प्रलयदुंदुभिध्वंसवाद्यर्थः निह्रादकइतिपाठेपितएवार्थः निर्घातः वज्रपातः २४ २५

स०
१२१

इतिसर्वमिदंराजन्नाकुलंप्रतिभातिमे १९ धृतराष्ट्र उवाच तस्याः कृपणचक्षुर्भ्यां प्रदह्येतापिमेदिनी अपिशेषंभवेदद्य पुत्राणांममसंजय
२० भरतानांस्त्रियः सर्वा गांधार्या सहसंगताः प्राक्रोशन्भैरवंतत्र दृष्ट्वा कृष्णांसभागतां २१ धर्मिष्ठांधर्मपत्नींच रूपयौवनशालिनीं
प्रजाभिः सहसंगम्य अनुशोचंतिनित्यशः २२ अग्निहोत्राण्यशाम्यन्त नचार्च्यन्त सर्वशः ब्राह्मणाः कुपितास्त्वासन्द्रौपद्याः परिकर्षणे
२३ आसीन्निह्रादकोघोरोनिर्घातश्चमहानभूत् दिवउल्कापतंतश्च राहुश्चार्कमुपाग्रसत् २४ अपर्वणिमहाघोरंप्रजानांजनयन्भयं
तथैवरथशालासुप्रादुरासीद्धुताशनः २५ ध्वजाश्चापिव्यशीर्यन्त भरतानामभूतये दुर्योधनस्याग्निहोत्रे प्राक्रोशन्भैरवंशिवाः
२६ तास्तदाप्रत्यभाषंतरासभाः सर्वतोदिशः प्रातिष्ठततोभीष्मोद्रोणेनसहसंजय २७ कृपश्चसोमदत्तश्च बाह्लीकश्चमहा
मनाः ततोहमब्रुवंतत्र विदुरेणप्रचोदितः २९ वरंददानिकृष्णायैकांक्षितंयद्यदिच्छसि अवृणोत्तत्रपांचालीपांडवानामदासतां
३० सरथान्सधनुष्कांश्चाप्यनुज्ञासिषमप्यहं अथाब्रवीन्महाप्राज्ञोविदुरः सर्वधर्मवित् ३१ एतदंतास्तुभरतायद्वः कृष्णास
भागतां येषापांचालराजस्यसुतासाश्रीरनुत्तमा ३२ पांचालीपांडवानेतान्दैवसृष्टोपसर्पति तस्याः पार्थाः परिक्लेशंन
क्षंस्यंतेद्यमर्षणाः ३३ ३३

शिवाः सृगालाः २६ २७ २८ २९ अनुज्ञासिषं अनुज्ञातवान् आडभावआर्षः पाठांतरेतुसुगमं ३० ३१ ३२ ३३

स०
१२१

स० १२२

कृष्णयोर्वा महेष्वासाः पांचाला वा महारथाः तेन सत्याभिसंधेन वासुदेवेन रक्षिताः ३४ आगमिष्यति बीभत्सुः पांचालैः परिवारितः ते
षां मध्ये महेष्वासो भीमसेनो महाबलः ३५ आगमिष्यति धुन्वानो गदां दंडमिवांतकः ततो गांडीवनिर्घोषं श्रुत्वा पार्थस्य धीमतः ३६ ग
दावेगं च भीमस्य नालं सोढुं नराधिपाः तत्र मे रोचते नित्यं पार्थैः साम न विग्रहः ३७ कुरुभ्यो हि सदा मन्ये पांडवान्बलवत्तरान् तथा हि ब
लवान्राजा जरासंधो महाद्युतिः ३८ बाहुप्रहरणेनैव भीमेन निहतो युधि तस्य ते शम एवास्तु पांडवैर्भरतर्षभ ३९ उभयोः पक्षयोर्यु
क्तं क्रियतामविशंकया एवं कृते महाराज परं श्रेयस्त्वमाप्स्यसि ४० एवं गावल्गणे क्षत्ता धर्मार्थसहितं वचः उक्तवान्नगृहीतं वै मया पुत्र
हितैषिणा ४१ इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां सभापर्वणि अनुद्यूतं समाप्तं ७९ एतत्सर्वं सभापर्व मयाख्यातं म
हर्षयः अध्यायाः सप्ततिर्ज्ञेया तथाष्टौ चात्र संख्यया ८० श्लोकानां द्वे सहस्रे तु पंच श्लोकशतानि च श्लोकाश्चैकादश तथा पर्वण्यस्मि
न्प्रकीर्तिताः इति सभापर्व समाप्तं अस्यानंतरमारण्यकं पर्व भविष्यति यस्यायमाद्यः श्लोकः जनमेजय उवाच एवं द्यूतजिताः पार्थाः
कोपिताश्च दुरात्मभिः धार्तराष्ट्रैः सहामात्यैर्निकृत्या द्विजसत्तम अथास्मिन्पर्वणि वृत्तांताः मयाभिगमनं सभानिर्माणं सभाप्रवेशः नार
दागमनं कच्चित्प्रश्नः देवसभावर्णनं राजसूयमंत्रः जरासंधोत्पत्तिः जरासंधवधः राजमोक्षणं दिग्विजयः राजसूयः राज्ञागमनं बल्याहर
णं राज्ञां नियोगः अर्घाभिहरणं शिशुपालकोपः शिशुपालवधः यज्ञसमाप्तिः वासुदेवगमनं दुर्योधननिवासः सभायां दुर्योधनो
पहासः दुर्योधनामर्षः दुर्योधनचिंता धृतराष्ट्रमंत्रः पांडवाह्वानं पांडवपराजयः द्यूतराज्यहरणं द्रौपदीप्रकर्षणं द्रौपदी
वरप्रदानं अनुद्यूतं पांडवपराजयः वनप्रस्थानमिति ॥ ॥

ध.४

राम० १२२

ॐ

सभापर्व पत्रे १२२ श्री३ मसनानसएजीतदेव
श्रीजेनप्रजी का श्री श्री वजी श्री मलजस्कें

सभापर्व
१२२

